श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६०

*गोपीवस्त्रापहरणवर्णनम्*

मदनातुरचेतसोऽन्वहं भवदङ्घ्रिद्वयदास्यकाम्यया।
यमुनातटसीम्नि सैकतीं तरलाक्ष्यो गिरिजां समार्चिचन्॥ १॥

तव नामकथारताः समं सुदृशः प्रातरुपागता नदीम्।
उपहारशतैरपूजयन् दयितो नन्दसुतो भवेदिति॥ २॥

इति मासमुपाहितव्रतास्तरलाक्षीरभिवीक्ष्य ता भवान्।
करुणामृदुलो नदीतटं समयासीत्तदनुग्रहेच्छया॥ ३॥

नियमावसितौ निजाम्बरं तटसीमन्यवमुच्य तास्तदा।
यमुनाजलखेलनाकुलाः पुरतस्त्वामवलोक्य लज्जिताः॥ ४॥

त्रपया नमिताननास्वथो वनितास्वम्बरजालमन्तिके।
निहितं परिगृह्य भूरुहो विटपं त्वं तरसाऽधिरूढवान्॥ ५॥

इह तावदुपेत्य नीयतां वसनं वः सुदृशो यथायथम्।
इति नर्ममृदुस्मिते त्वयि ब्रुवति व्यामुमुहे वधूजनैः॥ ६॥

अयि जीव चिरं किशोर नस्तव दासीरवशीकरोषि किम्।
प्रदिशाम्बरमम्बुजेक्षणेत्युदितस्त्वं स्मितमेव दत्तवान्॥ ७॥

अधिरुह्य तटं कृताञ्जलीः परिशुद्धाः स्वगतीर्निरीक्ष्य ताः।
वसनान्यखिलान्यनुग्रहं पुनरेवं गिरमप्यदा मुदा॥ ८॥

विदितं ननु वो मनीषितं वदितारस्त्विह योग्यमुत्तरम्।
यमुनापुलिने सचन्द्रिकाः क्षणदा इत्यबलास्त्वमूचिवान्॥ ९॥

उपकर्ण्य भवन्मुखच्च्युतं मधुनिष्यन्दि वचो मृगीदृशः।
प्रणयादयि वीक्ष्य वीक्ष्य ते वदनाब्जं शनकैर्गृहं गताः॥ १० ॥

इति नन्वनुगृह्य वल्लवीर्विपिनान्तेषु पुरेव सञ्चरन्।
करुणाशिशिरो हरे हर त्वरया मे सकलामयावलिम्॥ ११ ॥

**********